नियतारोपणोपायः स्यादारोपः परस्य यः।
तत्परं परितं श्लिष्टे वाचके भेदभाजि वा॥ यथा॥

विद्वन्मानसहंसवैरिकमलासङ्कोचदीप्तद्युते दुर्गामार्गण नीललोहितसमित्स्वीकारवैश्वानर। सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीमप्रभो साम्राज्यं वरवीरवत्सरशतं वैरिञ्च मुच्चैः क्रियाः॥

अत्र मानसमेव मानसम्। कमलायाः सङ्कोच एव कमलानामसङ्कोचः दुर्गाणाममार्गणमेवदुर्गायामार्गणं समितां स्वीकारएव समिधांस्वीकारः सत्येप्रीतिरेवसत्यामप्रीतिः। विजयः पराभवएव विजयोऽर्जुनः एवमारोपणनिमित्तो हंसादेरारोपः। यद्यपि शब्दार्थालङ्कारोयमित्युक्तं वक्ष्यते च तथापि प्रसिद्ध्यनुरोधादत्रोक्तः। एकदेशविवर्त्तिहीदमन्यै रप्यभिधीयते। भेदभाजि यथा॥

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः पूर्व्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः। संग्रामामृतसागरप्रमथन क्रीडा विधौ मन्दरो राजन् राजति वीरवैरिवनिता वैधव्यदस्ते करः॥

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति। निदर्शना। अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः। निदर्शनं दृष्टान्तकरणम्। उदाहरणं।

क्व सूर्य्यप्रभवोवंशः क्वचाल्पविषया मतिः। तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

अत्र उडुपेन सागरतरणमिव मन्मत्या सूर्य्यवंशवर्णनमित्युपमायां पर्य्यवस्यति ॥ यथा वा ॥

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्। वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥

अत्र कथमन्यस्य लीलामन्योवहतीति तत्सदृशीमित्युपमायां पर्य्यवसानं॥

दोर्भ्यां तितीर्षति तरङ्गवती भुजङ्गमादातुमिच्छति करे हरिणाङ्कबिम्बम्। मेरुं लिलङ्घयिषति ध्रुवमेष देव यस्ते गुणान् गदितुमुद्यममादधाति॥

इत्यादौ मालारूपाप्येषा द्रष्टव्या॥ स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सा परा। क्रिययैव स्वस्वरूपस्वकारणयोः सम्बन्धोयदवगम्यते सा परा निदर्शना॥ यथा॥

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ध्रुवं। शैल शेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः॥

अत्र पातक्रियया पतनस्य लाघवे सति उन्नत पदप्राप्तिरूपस्य कारणस्य च सम्बन्धः ख्याप्यते। अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया। अप्राक रणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुत प्रशंसा। कार्य्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति। तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा। तदन्यस्य कारणादेः क्रमेणोदाहरणं॥

याता किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्य्या नितरां कृशासि कथयत्येवं सवाष्पमयि। लज्जामन्थर तारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविम रणोत्साहस्तया सूचितः॥

अत्र प्रस्थानात्किमिति निवृत्तोसीति कार्य्ये पृष्टे कारणमभिहितम्॥

राजन् राजसुता न पाठयति मां देव्योपि तूष्णीं स्थिताः कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते। इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जराच्चित्रस्थानवलोक्य शून्य वलभावेकैकमाभाषते॥

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वद्रयः पलाय्य गता इति कारणे प्रस्तुते कार्य्यमुक्तम्॥

एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं वारिणो यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि । अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः कुत्रोड्डीयगतो ममेत्यनुदिनं निद्राति नान्तः शुचा ॥

अत्रास्थाने जडानां ममत्वसंभावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः ॥

सुहृद्वधूवाष्पजलप्रमार्ज्जनं करोति वैरप्रतियातनेन यः । स एव पूज्यः सपुमान्स्वनीतिमान्सुजीवनं तस्य सभाजनं श्रियः ।

अत्र कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं प्रशमयसि तत्त्वमेव श्लाघ्य इति विशेषे प्रकृते सामान्यमुदितं। तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः श्लेषः समासोक्तिः सादृश्यमात्रं वा तुल्यात्तुल्यस्य ह्याक्षेपे हेतुः॥ क्रमेणोदाहरणं ॥

पुंस्त्वादपि प्रविचलेद्यदि यद्यधोपि यायाद्यदि प्रणयनेन महानपि स्यात् । अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक् प्रकटिता पुरुषोत्तमेन॥ येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते युज्येत प्रतिकर्त्तुमेव न पुनस्तस्यैव पादग्रहः। क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नोमनागस्त्वेवं जड

धामतातु भवतीयद्गीोमि विस्फुर्ज्जसे ॥ आदाय वारिपरितः सरितो मुखेभ्यः किं तावदर्ज्जितमनेन दुरर्णवेन । क्षारीकृतं च वडवादहने कृतञ्च पातालकुक्षिकुहरे विनिवेशितञ्च ॥

इयञ्च काचिद्वाच्ये प्रतीयमानार्थानध्यारोपेणैव भवति ॥ यथा ॥

अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः पोतोपायाद्दृहि वहवोलङ्घनेपि क्षमन्ते । आहोरिक्तः कथमपि भवेदेष दैवात्तदानीं कोनामस्यादवटकुहरालोकनेप्यस्य कल्पः ॥

काचिदध्यारोपेणैव यथा ॥

कस्त्वं भोःकथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते नच्छायापि परोपकारकरणी मार्गस्थितस्यापि मे ॥

कचित्त्वंशेषाध्यारोपेण ॥ यथा ॥

सोपूर्व्वो रसनाविपर्य्ययविधिस्तत्कर्णयोश्चापलं दृष्टिःसा मदविस्मृतस्वपरदिक्किं भूयसोक्तेन वा । सर्व्वं विस्मृतवानसि भ्रमर हे यद्वारणोद्याप्यसा वन्तः शून्यकरोनिषेव्यत इति भ्रातः कएषग्रहः ॥

अत्र रसनाविपर्य्यासः शून्यकरत्वञ्च भ्रमरस्यासेवनेन हेतुः कर्णचापलन्तु हेतुः । मदःप्रत्युत

सेवने निमित्तं । निगीर्य्याध्यवसानन्तु प्रकृतस्य परेण यत् । प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनं । कार्य्यकारणयोर्यश्च पौर्वापर्य्यविपर्य्ययः विज्ञेयातिशयोक्तिः सा । उपमानेनान्तर्निगीर्णस्यो पमेयस्य यदध्यवसानं सैका ॥ यथा ॥

कमलमनम्भसि कमले च कुवलये तानि कनकलतिका याम् । सा च सुकुमारसुभगेत्युत्पातपरं परा केयं ॥

अत्र मुखादिकमलादिरूपतयाध्यवसितम् यच्च तदेवान्यत्वेनाध्यवसीयते सा परा ॥ यथा ॥

अण्णं लडहत्तणअं अण्णा विअ कावि वत्तणच्छाआ । सामा सामण्णपआवइणो रेहच्चिअ ण होइ ॥

यद्यर्थस्य यदिशब्देन चेच्छब्देन वा उक्तौ यत्कल्पनमर्थादसंभविनोर्थस्य सा तृतीया ॥ यथा ॥

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः । तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥

कारणस्य शीघ्रकारितां वक्तुं कार्य्यस्य पूर्व्व मुक्तौ चतुर्थी ॥ यथा ॥

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापवाणेन चरमं रमणीवल्लभलोचनविषयं त्वया भजता ॥

प्रतिवस्तूपमा तु सा । सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ॥ साधारणोधर्म्म उपमेयवाक्ये चोपमानवाक्ये च कथितपदत्वस्य दुष्टतयाऽभिहितत्वाच्छब्दभेदेन यदुपादीयते सा वस्तुनोवाक्यार्थस्योपमानत्वात्प्रतिवस्तूपमा यथा ॥

देवीभावङ्गमिता परिवारपदंकथं भजत्येषा । न खलु परिभोगयोग्यन्दैवतरूपाङ्कितं रत्नं । यदिदहत्यनलोचकिमद्भुतं यदिचगौरवमद्रिषु किं ततः । लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ॥

इत्यादिमालाप्रतिवस्तूपमा द्रष्टव्या एवमन्यचाप्यनुसर्त्तव्यम् दृष्टान्तःपुनरेतेषां सर्व्वेषां प्रतिबिम्बनं एतेषां साधारणधर्म्मादीनां दृष्टोन्तःनिश्चयो यत्र स दृष्टान्तः॥

त्वयि दृष्टएव तस्यानिर्वाति मनोमनोभवज्वलितम् । आलोके हि हिमांशोर्विकसति कुमुदं कुमुदत्याः ॥

एष साधर्म्येण वैधर्म्येणतु ।

तवाहवे साहसकर्म्मशर्मणः करं कृपाणान्तिकमानिनीषतः । भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांशवः ॥

सकृद्वृत्तिस्तु धर्म्मस्य प्रकृताप्रकृतात्मनाम्। सैव क्रियासु बह्वीषु कारकस्येति दीपकं। प्राकरणिकानामर्थादुपमानोपमेयानां धर्म्मः क्रियादिरेकवारमेव यदुपादीयते तदेकस्यैव समस्तवाक्यदीपनाद्दीपकं॥ यथा॥

किवणाणंधणंणाआणंफणमणीकेसराइंसीहाणम्। कुलवालिआणंथणा कुत्तोघिप्पन्ति अमुआणं॥

कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकं॥ यथा॥

स्विद्यति कूणति वेल्लति विवलति निमिषति विलोकयति तिर्य्यक्। अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने॥

मालादीपकमाद्यञ्चेद्यथोत्तरगुणावहं पूर्व्वेण पूर्व्वेणवस्तुनोत्तरमुत्तरं चेदुपक्रियते तन्मालादीपकं॥ यथा॥

संग्रामाङ्गणमागतेन भवता चापे समारोपिते देवाकर्णय येन येन महसायद्यत्समासादितं। कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलन्तेन त्वं भवताचकीर्त्तिरतुला कीर्त्त्या चलोकत्रयं॥

नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता। नियतानां प्राकरणिकानामेवाप्राकरणिकानामेव वा ॥ क्रमेणोदाहरणं॥

पाण्डुक्षामं वदनं हृदयं सरसं तवालसञ्च वपुः। आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥ कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का। अमृतममृतरश्मिरम्बुजन्मप्रतिहतमेकपदे तवाननस्य॥

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः। अन्यस्योपमेयस्य व्यतिरेक आधिक्यं॥ यथा॥

क्षीणः क्षीणोऽपि शशी भूयोभूयोऽभिवर्द्धते सत्यं। विरम प्रसीद सुन्दरि यौवनमनिवर्त्तियातन्तु॥

इत्यादावुपमानस्योपमेयादाधिक्यमिति यत्केनचिदुक्तन्तदयुक्तं अत्र यौवनगताऽस्थैर्य्यस्याधिक्यं हि विवक्षितं हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते। शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रिरष्ट तत्। व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तमुपमानगतमपकर्षकारणं तयोर्द्वयोरुक्तिः। एकतरस्य द्वयोर्वानुक्तिरित्यनुक्तित्रयं एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते। अर्थेन च

क्रमेणोक्तौ चत्वारएव भेदाः। आक्षिप्ते चौपम्ये तावन्तएव। एवं द्वादश एते श्लेषेपि भवन्तीति चतुर्व्विंशतिभेदाः। क्रमेणोदाहरणं॥

अयि मात्रसहायस्य प्रभूतारिपराभवे। अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः॥

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्य्यायेण युगपद्वाऽनुपादानेऽन्यभेदत्रयं। एवमन्येष्वपि द्रष्टव्यं। अत्रेवशब्दस्य सद्भावाच्छाब्दमौपम्यम्॥

असिमात्रसहायोपि प्रभूतारिपराभवे। नैवान्यतुच्छजनवत्सगर्वोयं धृतेर्निधिः॥

तुल्यार्थे वतिरित्यार्थमौपम्यं॥

इयं सुनयना दासीकृततामरसश्रिया। आननेनाकलङ्केन जयतीन्दुं कलङ्कितं॥

अत्रेवादितुल्यादि पद विरहे आक्षिप्तैवोपमा॥

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः। अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः॥

अत्रेवार्थे वतिः। गुणशब्दः श्लिष्टः। शाब्दमौपम्यं॥

अखण्डमण्डलः श्रीमान्पश्यैष पृथिवीपतिः। न निशाकरवज्जातु कलावैकल्यमागतः॥

अत्र तुल्यार्थे वतिः । कलाशब्दः श्लिष्टः माला प्रतिवस्तूपमावन्मालाव्यतिरेकोपि सम्भवति तस्यापि भेदा एवमूह्याः दिङ्मात्रञ्चोदाह्रियते । यथा ॥

हरवन्न विषमदृष्टिर्हरिवन्न विभोविधूतविततवृषः । रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ॥

अत्र तुल्यार्थेवतिः । विषमादयश्च शब्दाःश्लिष्टाः ॥

नित्योदितप्रतापेन त्रियामामीलितप्रभः । भास्वतानेन भूपेन भास्वानेष विनिर्ज्जितः ॥

अत्र व्याक्षिप्तैवोपमा । भास्वतेति श्लिष्टः ॥ यथा वा ॥

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं बिम्बप्रभाधरमकृत्रिमहृद्यगन्धं । यूनामतीव पिबतां रजनीषु यत्र तृष्णां जहार मधु नाऽननमङ्गनानाम् ॥

अत्रेवादीनां तुल्यादीनाञ्च पदानामभावेपि श्लिष्टविशेषणाक्षिप्तैवोपमा प्रतीयते एवंजातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येपिभेदाः सम्भवन्ति तेप्यनयैवदिशा द्रष्टव्याः ॥ निषेधोवक्तुमिष्टस्य योविशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपोद्विधा मतः । विवक्षितस्य प्राकरणिकत्वादनुपसर्ज्जनीकार्य्यस्याशक्यवक्तव्यत्वमतिप्रसि

ष्टत्वं वा विशेषं वक्तुं निषेधोनिषेधइव यः स वक्ष्य माणविषयउक्तविषयश्चेति द्विधा आक्षेपः ॥ क्रमेणोदाहरणं ॥

एएहिकिं पिकीए विकएण णिक्किव्वभणामि अलमहवा। अविआरिअकज्जारम्भआरिणी मरउण भणिस्सं॥ ज्योत्स्नामौक्तिकदामचन्दनरसः शीतांशुकान्तद्रवः कर्पूरं कदलीमृणालवलयान्यम्भोजिनीपल्लवाः। अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्करव्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे॥

क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना। हेतुरूपक्रियायानिषेधेपि तत्फलप्रकाशनं विभावना॥ यथा॥

कुसुमितलताभिरहताप्यधत्तरुजमलिकुलैरदष्टापि।
परिवर्त्तते स्म नलिनीलहरीभिरलोलिताप्यघूर्णत सा॥

विशेषोक्तिरखण्डेषु कारणेषु फलावचः। मिलितेष्वपि कारणेषु कार्य्यस्याकथनं विशेषोक्तिः अनुक्तनिमित्ता। उक्तनिमित्ता। अचिन्त्यनिमित्ता च। क्रमेणोदाहरणं॥

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदंपराप्ते। श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा॥ कर्पूर

इव दग्धोपि शक्तिमान्योजने जने। नमोस्त्ववार्य्यवीर्य्याय तस्मै मकरकेतवे॥ स एकस्त्रीणि जयति जगन्ति कुसुमायुधः। हरतापि तनुं यस्य शम्भुना न बलं हृतं॥

यथा संख्यंक्रमेणैव क्रमिकाणां समन्वयः॥ यथा॥

एकस्त्रिधा वससि चेतसि चित्रमत्र देवद्विषाञ्च विदुषाञ्च मृगीदृशाञ्च। तापञ्च संमदभरञ्च रतिञ्च पुष्णन् शौर्य्योष्मणा च विनयेन च लीलया च॥

सामान्योवा विशेषोवा तदन्येन समर्थ्यते। यत्र सोर्थान्तरन्यासः साधर्म्येणेतरेण वा। साधर्म्येण वैधर्म्येणवा सामान्यं विशेषेण यत्समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः॥ क्रमेणोदाहरणं॥

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतं। पश्यति पीतोपहतः शशिशुभ्रं शङ्खमपि पीतं॥ सुसितवसनालङ्कारायां कदाचन कौमुदीमहसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः। तदनु भवतः कीर्त्तिःकेनाप्यगीयत येन सा प्रियगृहमगान्मुक्ताशङ्का क नासिशुभप्रदः॥ गुणानामेव दौरात्म्याद्धुरिधुर्य्योनियुज्यते। असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः॥ अहोहि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं

सवेदम्। तएव धन्याः सुहृदः पराभवं जगत्यदृष्टैव हि क्षयं गताः॥

विरोधःसोविरोधेपि विरुद्धत्वेन यद्वचः। वस्तुवृत्तेरविरुद्धेपि विरुद्धयोरिव यदभिधानं सविरोधः। जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धास्याद्गुणस्त्रिभिः॥ क्रियाद्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश॥

अभिनवनलिनीकिसलयमृणालवलयादिदवदहनराशिः सुभगकुरङ्गदृशोस्याविधिवशतस्तद्वियोगपविपाते। गिरयोप्यनुन्नतियुजोमरुदप्यचलोब्धयोप्यगम्भीराः विश्वम्भराप्यतिलघुर्नरनाथ तवान्तिके नियतं॥ येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधरस्तीक्ष्णः सोप्यनुरज्यत च कमपि स्नेहं परां प्रीतिं च। तेषां सङ्गरसङ्गसक्तमनसां राज्ञां त्वया भूपते पांशूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकं॥ सृजति च जगदिदमवति च संहरति च हेलयैव योनियतं। अवसरवशतः शफरोजनार्दनः सोपि चित्रमिदं॥ सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते। द्विजपत्नीनां कठिनाः सति भवति कराः सरोज सुकुमाराः। पेशलमपि खलवचनं दहतितरां मानसं सुतत्त्वविदां। परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति॥ क्रौञ्चाद्रिरुद्दामदृषदृढोयं यन्मार्गणानर्गलशातपाते। अभून्नवांभोजदलाभिजातः सभार्गवः सत्य

मपूर्वधर्मः ॥ परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यौ न गतवान्। विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते ॥ अयं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः। क एवं जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ समद मतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात। क्षितितिलकत्वयि तटजुषि शङ्करचूडापगापि कालिन्दी ॥

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनं।

स्वयोस्तदेकाश्रययोः रूपं वर्णः संस्थानञ्च। उदाहरणं ॥

पश्चादङ्घ्री प्रसार्य्य त्रिकनति विततं द्राघयित्वाङ्गमुच्चैरासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय। घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥

व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ॥

व्याजरूपा व्याजेन वा स्तुतिः। क्रमेणोदाहरणं ॥

हिमालयं मुपरोधबन्ध्यमनसां मन्येन मौलिः परो लज्जावर्जनमन्तरेण नरमामन्यत्र संदृश्यते। यस्त्यागमनुतेतरां

मुखशतैरित्यागतायाः श्रियः प्राप्यत्यागकृतावधाननमपि लभ्येव यस्याः क्षितिः॥ हेहेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तो यधेनास्ति समस्त्वदृशः परः परहिताधाने गृहीतव्रतः। तृष्यत्या न्यजनोपकारघटनावैमुख्यलब्धायशोभारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः॥

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकं॥

एकार्थाभिधायकमपि सहार्थबलाद्यदुभयस्यावगमकं सा सहोक्तिः॥ यथा॥

सहदिअसणिसाहिं दीहरासासदण्डा सह मणिवलएहिं वाहधारा गलन्ति। तुह सुहअ विओए तीए उव्वेइरीए सह अतणुलदाए दुब्बलाजीविदासा॥

अत्र श्वासदण्डादिगतं दीर्घत्वादि शाब्दं दिवसनिशादिगतं तु सहार्थसामर्थ्यात्प्रतिपद्यते। विनोक्तिः सा विनान्येन यत्रान्यः सन्न चेतरः। क्वचिदशोभनः। क्वचिच्छोभनः॥ क्रमेणोदाहरणं॥

अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः। उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः॥ मृग लोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः। अमृत द्युतिसुन्दराशयोयं सुहृदा तेन विना नरेन्द्रसूनुः॥

परिवृत्तिर्विनिमयोयोऽर्थानां स्यात्समासमैः। परिवृत्तिरलङ्कारः ॥ उदाहरणं ॥

लतानामेतासामुदितकुसुमानां मरुदयं मतं लास्यं दत्वा श्रयति भृशमामोदमसमं। लतास्त्वध्वन्यानामहह दृशमादाय सहसा ददत्याधिव्याधिभ्रमरुदितमोहव्यतिकरं ॥

अत्र प्रथमेऽर्द्धे समेन समस्य द्वितीये उत्तमेन न्यूनस्य ॥

नानाविधप्रहरणैर्नृपसंप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान्। दृप्तारिवीरविसरेण वसुन्धरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥

अत्र न्यूनेनोत्तमस्य। प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः। तद्भाविकं। भूताश्च भाविनश्चेति द्वन्द्वः। भावः कवेरभिप्रायोऽस्तीति भाविकं॥ उदाहरणं॥

आसीदञ्जनमत्रेति पश्यामि तव लोचने। भाविभूषणसम्भारां साक्षात्कुर्वे तवाकृतिं ॥

अत्राद्ये भूतस्य द्वितीये भाविनो दर्शनं। काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥ यथा ॥

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्। नमन्मुक्तः सम्प्रत्यहमतनुरग्रेप्यनतिभाक्महेश क्षन्तव्यं तदिदमपराधद्वयमपि॥

अनेकपदार्थता यथा॥

प्रणयसखीसलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पहननैरपि ताम्यति यत्। वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्यकाण्डयमदण्ड इवैष भुजः॥

एकपदार्थता यथा॥

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं हा सोपानपरंपरां गिरिसुता कान्तालयालङ्कृतिं। अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे॥

एष्वपराधद्वये पूर्वापरजन्मनोरनमनं भुजपाते शस्त्रोपक्षेपो महामोहे सुखालोकोच्छेदित्वञ्च यथाक्रममुक्तरूपो हेतुः। पर्यायोक्तं विना वाच्यवाचकत्वेन वस्तु यत्। वाच्यवाचकभावव्यतिरिक्तेनावगमनव्यापारेण यत्प्रतिपादनं तत्पर्य्यायेण भङ्ग्यन्तरेण कथनात्पर्य्यायोक्तं॥ उदाहरणं॥

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता। मदेनैरावणमुखमानेन हृदये हरेः॥

अत्रैरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्य मपि शब्देनोच्यते तेन यदेवोच्यते तदेव व्यङ्ग्यं यथा तु व्यङ्ग्यं न तथोच्यते। यथा गवि शुक्ले चलति दृष्टे गौः शुक्लश्चलतीति विकल्पोयदेव दृश्यते तदेव विकल्पयति नतु यथादृष्टं तथा यतोभिन्ना संदृष्टत्वेन दृष्टंभेदसंसर्गाभ्यां विकल्पयति उदात्तं वस्तुनः सम्पत्समृद्धियोगः॥ यथा॥

मुक्ताः केलिविसूत्रहारगलिताः सम्मार्ज्जनीभिर्हृताः प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः। दूराद्दाडिम वीजशङ्कितधियः कर्षन्ति केलीशुका यद्विद्वद्भवनेषु भोजनृपते स्तत्त्यागलीलायितं॥

महतांचोपलक्षणं। उपलक्षणमङ्गभावः। अर्था दुपलक्षणीयेऽर्थे॥ उदाहरणं॥

तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी। निव सन्बाहुसहायश्चकार रक्षःक्षयं रामः॥

नचात्र वीरोरसस्तस्येहाङ्गत्वात् तत्सिद्धिहेता वेकस्मिन्यत्रान्यत्तत्करं भवेत्। समुच्चयोसौ तस्य प्रस्तुतस्य कार्य्यस्यैकस्मिन्साधके स्थिते साधकान्त राणि यत्र सम्भवति स समुच्चयः॥ उदाहरणं॥

दुर्व्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोत्युत्सुकं गाढं प्रेम नवंवयोतिकठिनाः प्राणाः कुलं निर्मलं। स्त्रीत्वं धैर्य्यविरोधि मन्मथसुहृत्कालः कृतान्तोऽक्षमी नोसख्यश्चतुराः कथंनु विरहः सोढव्यइत्थं शठः॥

अत्र विरहासहत्वं स्मरमार्गणाएवकुर्वते तदु प्रियतमदूरस्थित्याद्युपात्तं एषएव समुच्चयः सद्योगेऽसद्योगेसदसद्योगे च पर्य्यवस्यतीति न पृथग्लच्यते तथाहि॥

कुलममलिनं भद्रा मूर्त्तिर्मतिः श्रुतशालिनी भुजबलमबलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितं। प्रकृतिः सुभगाह्येते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं राजंस्त एव तवाङ्कुशाः॥

अत्र सतांयोगः उक्तोदाहरणे त्वसतां योगः॥

शशी दिवसधूसरोगलितयौवना कामिनी सरोविगत वारिजं मुखमनचरं स्वाकृतेः। प्रभुर्द्धन परायणः सततदुर्गतः सज्जनोनृपाङ्गणगतः खलोमनसि संप्त शल्यानि मे॥

अत्रशशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशोभनयोगः सत्वन्या युगपद्या गुणक्रियाः गुणौ च क्रियेच गुणक्रियेच गुणक्रियाः॥ क्रमेणोदाहरणं॥

विदलितसकलारिकुलं तव बलमिदमभवदाशुविमलञ्च प्रखलमुखानि नराधिप मलिनानि च तानि जातानि। अयमेक

यदि तथाविद्योगः प्रियया चोपनतः सुदुःसहोमे॥ नववारिध रोदयाद्रहोभिर्भवितव्यञ्च निरातपत्वरम्यैः। कलुषञ्च तवाहि तेष्व कस्मात्सितपङ्कहसोदरश्रि चक्षुः॥ पतितञ्च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदाङ्कटाक्षैः॥

धुनोति चासिं तनुते च कीर्त्तिमित्यादेः कृपाणपाणिश्च भवान्रणक्षितौ ससाधुवादाश्च सुराः सुरालयेइत्यादेश्च दर्शनाद्यधिकरणे इत्येकस्मिन्देशइति न वाच्यम् एकं क्रमेणानेकस्मिन् पर्य्यायः एकंवस्तु क्रमेणानेकस्मिन्भवति क्रियतेवा सपर्य्यायः॥ क्रमेणोदाहरणं॥

श्रोणीभारस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यांमुक्तास्तरलगतयः संश्रितालोचनाभ्यां। धत्ते वक्षः कुचसचिवतामद्वितीयञ्च वक्त्रं तद्गात्राणां गुणविनिमयः कल्पितोयौवनेन॥ यथावा। नन्वाश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा। प्रागर्णवस्यहृदये वृषलक्ष्मणोथ कण्ठेधुना वससि वाचि पुनः खलानाम्॥ यथावा॥ विम्बोष्ठ एव रागस्ते तन्वि पूर्व्वमदृश्यत। अधुनाहृदयेप्येष मृगशावाक्षि दृश्यते॥

रागस्य वस्तुतोभेदेप्येकतयाध्यवसितत्वादेकत्वमविरुद्धम्॥

तत्ताणसिरिसहो अररअणाहरणमिहिअअमेकरअं।
विंबाहरेपिआणं निवेसिअं कुसुमवाणेन ॥

अन्यस्ततोऽन्यथा अनेकमेकस्मिन् क्रमेणभवति क्रियते वासोऽन्यः । क्रमेणोदाहरणं॥

मधुरिमरुचिरं वचः खलानाममृतमहोप्रथमं पृथु व्यनक्ति अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ॥ तद्गेहं नतभित्तिमन्दिरमिदं लब्धावकाशं दिवः सा धेनुर्जरती न दन्तिकरिणामेता घनाभाघटाः । सचुद्रोमुशल ध्वनिः कलमिदं सङ्गीतकं योषितामाश्चर्य्यं दिवसैर्द्विजोयमियं तीं भूमिं समारोपितः ॥

अनेकस्यैव हानोपादानयोरविवक्षितत्वान्न परिवृत्तिः अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः। पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपोहेतुः साधनं धर्मिण्ययोगव्यवच्छेदोव्यापकस्य साध्यं यथा ॥

यत्रैतालहरीचलाचलदृशोव्यापारयन्तिभ्रुवं तत्रैव प्रपतन्ति सन्ततममी मर्मस्पृशोमार्गणाः । तच्चक्रीकृतचापमञ्चितशर प्रेङ्खत्करः क्रोधनोधावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ॥

साध्यसाधनयोः पौर्व्वापर्य्यविकल्पे न किञ्चिद्वैचित्र्यमिति न तथादर्शितं विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः । अर्थाद्विशेष्यस्य ॥ उदाहरणं ॥

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्त्तयः। न संहतास्तस्य नभेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुं॥

यद्यप्यपुष्टार्थस्य दोषताभिधानात्तन्निराकरणेन पुष्टार्थस्वीकारः कृतस्तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कारमध्ये गणितः व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनं। निगूढमपि वस्तुनोरूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः नचैषापह्नुतिः प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासम्भवात्॥ उदाहरणं॥

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंष्टुलाखिलविधिव्यासङ्गभङ्गाकुलः। हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्स्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोवतादः शिवः॥

अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः किञ्चित्पृष्टमपृष्टं वा कथितं यत्प्रकल्प्यते। तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता। प्रमाणान्तरावगतमपि वस्तु शब्देन प्रति

पादितं प्रयोजनान्तराभावात्सदृशवस्त्वन्तरव्यव च्छेदाय यत्पर्य्यवस्यति सा भवेत्परिसंख्या अत्र च कथनं प्रश्नपर्व्वकं तदन्यथाच परिदृष्टं तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वा रोभेदाः। क्रमेणोदाहरणं ॥

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः। किमाराध्यं पुण्यं किमभिलषणी यञ्च करुणा यदासक्त्या चेतोनिरवधि विमुक्तौ प्रभवति॥ किंभू षणं सुदृढमत्र यशोन रत्नं किं कार्यमार्य्यचरितं सुकृतं न दोषः। किञ्चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकम्। कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते। काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति॥ भक्ति र्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे। चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम्॥

यथोत्तरं चेत्पूर्व्वस्य पर्व्वस्यार्थस्य हेतुता। तदा कारणमाला स्यात् उत्तरमुत्तरं प्रति यथोत्तरं॥

उदाहरणं॥

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते। गुणप्रकर्षेण जनोनुरज्यते जनानुरागप्रभवाहि संपदः॥

हेतुमता सह हेतोरभिधानमभेदतो हेतुरिति हेत्वलङ्कारेण लक्षितः आयुर्घृतमित्यादिरूपो ह्येष नभूषणतां कदाचिदर्हति वैचित्र्याभावात् ॥

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥

इत्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैवस माम्नासिषुर्नपुन हेत्वलङ्कारः कल्पनयेति पूर्वोक्त काव्यलिङ्गमेव हेतुः क्रियया तु परस्परं वस्तुनोर्जन नेऽन्योन्यं अर्थयोरेकक्रियामुखेन परस्परंकारणत्वे सत्यन्योन्यंनामालङ्कारः ॥ उदाहरणं ॥

हंसाणंसरेहिं सिरीसारिज्जइअहसराणंहंसेहिं । अणोणं
विअएएअप्पाणं णवरगहअन्ति ॥

अत्रोभयेषामपि परस्परजनकता मिथः श्रीसारतासंपादनद्वारेण उत्तरश्रुतिमात्रतः प्रश्न स्योन्नयनं यत्र क्रियते तत्र वासति । असकृद्यदसं भाव्यमुत्तरं स्यात्तदुत्तरम् प्रतिवचनापलम्भादेव पूर्ववाक्यं यत्र कल्प्यते तदेकंतावदुत्तरं ॥ उदाहरणं ॥

वाणिअअ हत्थिदन्ताकत्तो अम्हाणं वग्घकत्तीअ । जावल
लिआलअमुही घरम्मि परिसक्कइसोह्ना ॥

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी मूल्येन ताः प्रयच्छेति क्रेतुर्वचनममुना वाक्येन समुन्नीयते। नचैतत्काव्यलिङ्गमुत्तरस्य तादृप्यानुपपत्तेः नहि प्रश्नस्य प्रतिवचनं जनको हेतुः नापीदमनुमानं एकधर्म्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलङ्कारान्तरमेवोत्तरं साधीयः प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यदसम्भाव्यरूपं प्रतिवचनंस्यात्तदपरमुत्तरं अनयोश्च सकृदुपादानेन चारुताप्रतीतिरित्यसकृदित्युक्तं ॥ उदाहरणं ॥

का विसमा देव्व गई किं दुलहं जं जणो गुणग्गाही। किं सोक्खं सुकलत्तं किं दुःखं जं खलो लोओ ॥

प्रश्नपरिसंख्यायामन्यव्यपोह एव तात्पर्य्यमिह तु वाच्य एव विश्रान्तिरित्यनयोर्विवेकः कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते। धर्मेणकेनचिद्यत्तत्सूक्ष्मं परिचक्षते। कुतोप्याकारादिङ्गितादा सूक्ष्मस्तीक्ष्णमतिसंवेद्यः ॥ उदाहरणं ॥

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे। पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥

अत्राकृतिमालोक्य कयापि वितर्कितं पुरुषायितमसितलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतं पुंसामेव कृपाणपाणिता योग्यत्वात् यथावा सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ईषन्नेत्रार्पिता कृतं लीलापद्मं निमीलितम् अत्रजिज्ञासितः सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितोनिशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः। उत्तरोत्तरमुत्कर्षोभवेत्सारः परावधिः। परः पर्य्यन्तभागोवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः॥ उदाहरणं॥

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधं सौधे तल्पं तल्पे वराङ्गनानङ्गसर्व्वस्वं॥ भिन्नदेशतयात्यन्तं कार्य्यकारणभूतयोः। युगपद्धर्मयोर्यत्र ख्यातिः सास्यादसङ्गतिः इहयद्देशकारणं तद्देशमेव कार्य्यमुत्पद्यमानं दृष्टं॥

यथा धूमादि यत्रहेतुफलरूपयोरपि धर्म्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनं सा तयोः स्वभावोत्पन्नपरस्परसङ्गतित्यागादसङ्गतिः॥ उदाहरणं॥

जस्सेअवणोतस्सेअवेअणाभणइ तं जणो अलिअं। दन्तक्खअं कवोले वहूए वेअणासवत्तीणं॥

एषा च विरोधबाधिनी न विरोधः भिन्नाधार तयैव द्वयोरिह विरोधितायाः प्रतिभासात् विरोधेतुविरोधित्वमेकाश्रयनिष्ठमनुक्तमपि पर्य्यवसितमपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेस्तथा चेदं निदर्शितं। समाधिः सुकरं कार्य्यंकारणान्तरयोगतः। साधनान्तरोपकृतेन कर्त्त्रा यदक्लेशेन कार्य्यमारब्धमाधीयते स समाधिर्नाम॥ उदाहरणं॥

मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं॥

समं योग्यतया योगोयदिसंभावितः क्वचित्। इदमनयोः श्लाघ्यमिति योग्यतया सम्बन्धस्य नियतविषयमध्यवसानं चेत्तदा समं तत्सद्योगेऽसद्योगे च॥ उदाहरणं॥

धातुःशिल्पातिशयनिकषस्थानमेषा मृगाक्षीरूपे देवोप्ययमनुपमोदत्तपत्रः स्मरस्य। जातं दैवात्सदृशमनयोः सङ्गतं यत्तदेतच्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रं॥ यथावा। चित्रं चित्रं वत वत महच्चित्रमेतद्विचित्रं जातोदैवादुचितरचनासंविधाता विधाता। यन्निम्बानां परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलनकलाकोविदः काकलोकः॥

क्वचिद्यदतिवैधर्म्यान्न श्लेषोघटनामियात्। कर्त्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत्। गुणक्रियाभ्यां कार्य्यस्य कारणस्य गुणक्रिये। क्रमेण च विरुद्धे यत्स एष विषमोमतः। द्वयोरत्यन्तविलक्षणतया यदनुपपद्यमानतयैव योगः प्रतीयते यच्च किञ्चिदारभमाणः कर्त्ता क्रियायाः प्रणाशान्न केवलमभीष्टं तत्फलं न लभेत यावदप्रार्थितमप्यनर्थं विषयमासादयेत् तथा सत्यपि कार्य्यस्य कारणरूपानुकारे यत्तयोर्गुणौ क्रियेच परस्परविरुद्धतां व्रजतः स समविपर्य्ययात्मा चतूरूपोविषमः॥ क्रमेणोदाहरणं॥

शिरीषादपि मृदङ्गी केयमायतलोचना। अयं क्वचकुकूलाग्निकर्कशोमदनानलः॥ सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः। जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॥ सद्यःकरस्पर्शमवाप्यचित्रं रणे रणे यस्य कृपाणलेखा। तमालनीला शरदिन्दुपाण्डुयशस्त्रिलोक्याभरणं प्रसूते॥ आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वं। विरहस्त्वयैव जनितस्तापयतितरां शरीरम्मे॥

अत्रानन्ददानं शरीरतापेन विरुध्यते एवं॥

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये। मदविभ्रमासकलया पपे पुनः सपुरस्त्रियैकतमयैकहेलया ॥

इत्यादावपि विषमत्वं यथायोगमवगन्तव्यं। महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात्। आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकन्तु तत्। आश्रितमाधेयं आश्रयस्तदाधारः तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यदधिकतरतां व्रजतस्तदिदं द्विविधं अधिकं नाम। क्रमेणोदाहरणं ॥

अहो विशालं भूपालभुवनत्रितयोदरं। माति मातुमशक्यापि यशोराशिर्यदत्र ते॥ युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत। तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः॥ प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया। या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत्तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं तदनीकप्रतिनिधितुल्यत्वात्प्रत्यनीकमभिधीयते। यथानीकेऽभियोज्ये तत्प्रतिनिधीभूतमपरंगूढतया केनचिदभियुज्यते तथेह प्रति

योगिनि विजेये तदीयोन्योविजीयत इत्यर्थः॥ उदाहरणं॥

त्वं विनिर्जितमनोभवरूपः सा च सुन्दरभवत्यनुरक्ता। पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः॥ यथा॥

यस्य किञ्चिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः। कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते॥

इन्दोरत्र तदीयतासम्बन्धिमुखसम्बन्धात्। समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते। निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्। सहजमागन्तुकं वा किमपि साधारणं यल्लक्षणं तद्द्वारेण किञ्चित्केनचिद्वस्तु स्थित्यैव वलीयस्तया तिरोधीयते तन्मीलितमिति द्विधा स्मरन्ति॥ क्रमेणोदाहरणं॥

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो विलासभरमन्थरा गतिरतीव कान्तं मुखं। इतिस्फुरितमङ्गके मृगदृशः स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते॥

अत्र हक्तरलतादिकमङ्गस्य लिङ्गं स्वाभाविकं साधारणञ्च मदोदयेन तत्राप्येतस्य दर्शनात्॥

ये कन्दरासु निवसन्ति सदा हिमाद्रेस्त्वत्पातशङ्कितधियो विवशाद्विषस्ते। अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं तेषामहो वत भियां नवुधोप्यभिज्ञः॥

अत्रतु सामर्थ्यादवसितस्य शैत्यस्यागन्तुकत्वात्तत्प्रभवयोरपि कम्पपुलकयोस्ताद्रूप्यं समानताभयेष्वपि तयोरुपलक्षितत्वात्। स्थाप्यतेऽपोह्यते वापि यथापूर्व्वं परम्परं। विशेषणतया यत्र वस्तु सैकावलीद्विधा। पूर्व्वंपूर्व्वं प्रति यत्रोत्तरोत्तरस्य वस्तुनोवीप्सया विशेषणभावेन यत् स्थापनं निषेधोवा सम्भवति सा द्विधा वुधैरेकावली भण्यते॥ क्रमेणोदाहरणं॥

पुराणि यस्यां सवराङ्गनानि वराङ्गनारूपपुरस्कृताङ्गः रूपं समुन्मीलित सद्विलासमस्त्रं विलासाः कुसुमायुधस्य। नत ज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदं न षट्पदोसौ कलगुञ्जितोन योन गुञ्जितं तन्न जहार यन्मनः॥

पूर्व्वत्र पुराणां वराङ्गनास्तासामङ्गविशेषणमुखेन रूपं तस्य विलासास्तेषामप्यस्त्रमित्यमुना क्रमेण विशेषणं विधीयते उत्तरत्र प्रतिषेधोप्येवं योज्यं। यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः। स्मरणं यः पदार्थः केनचिदाकारेण नियतोयदा कदाचिदनुभूतोभूत्स कालान्तरे स्मृतिप्रबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत्तथैव स्मर्य्यते तद्भवेत्स्मरणं॥ उदाहरणं॥

निम्ननाभिकुहरेषु यदम्भःप्लावितं चलदृशां लहरीभिः।
तद्भवैः कुहरुतैः सुरनार्य्यः स्मारिताः सुरतकण्ठरुतानाम्॥

यथा वा। करजुअ गहिअ जसोआयणमुहे णिवेसिआधरपुड
स्स सम्भरिअ पञ्चजण्णसुणमहक कक्कसारोमञ्चं॥

भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने तदित्यन्यद् प्राकरणिकं निर्दिश्यते तेन समानमर्थादिह प्राकरणिकमाश्रीयते तस्य तथाविधस्य दृष्टौ सत्यां यद् प्राकरणिकतया सम्वेदनं स भ्रान्तिमान् नचैष रूपकं प्रथमातिशयोक्तिर्वा तत्र वस्तुतोभ्रमस्याभावात् इह चार्थानुगमनेन संज्ञायाप्रवृत्तेस्तस्य स्पष्टमेव प्रतिपन्नत्वात्॥ उदाहरणम्॥

कपाले मार्जारः पय इति कराल्लेढि शशिनस्तरुच्छिद्रप्रोतान्बिसमिति करी संकलयति। रतान्ते तल्पस्थान्हरति वनितापंशुकमिति प्रभामत्तश्चन्द्रोजगदिदमहो विप्लवयति॥

आक्षेप उपमानस्य प्रतीपमुपमेयता तस्यैव यदि वा कल्प्यातिरस्कारनिबन्धनं अस्यधुरं सुतरांमुपमेयमेव वोढुं प्रौढमिति कैमुत्येन यदुपमानमाक्षिप्यते यदपि तस्यैवोपमानतया प्रसिद्धस्योपमानान्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते

त्तस्य प्रतीतेश्च बाधायोगात् विना प्रसिद्धमाधार माधेयस्य व्यवस्थितिः। एकात्मा युगपद्वृत्तिरेकस्या नेकगोचरा। अन्यत्प्रकुर्व्वतः कार्य्यमशक्यस्यान्य वस्तुनः तथव करणंचेति विशेषस्त्रिविधः स्मृतः। प्रसिद्धाधारपरिहारेण यदाधेयस्य विशिष्टा स्थिति रभिधीयते स प्रथमोविशेषः॥ उदाहरणं॥

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां। रमयन्ति जगन्ति गिरः कथमिह कवयोन ते वन्द्याः॥

एकमपि वस्तु यदेकेनैव स्वभावेन युगपदने कत्र वर्त्तते सद्वितीयः॥ उदाहरणं॥

सा लसइ तुज्झ हिअए सा चेअ अच्छीसु सा अ वअणेसु। अम्हा रिसाणं सुन्दर ओआसो णत्थि पावाणं॥

यदपि किञ्चिद्रभसेनारभमाणस्तेनैव यत्नेना शक्यमपि कार्य्यान्तरमारभते सोपरोविशेषः॥ उदा हरणं॥

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यं। विधिना ससृजे नवोमनोभूर्भुवि सत्यं सविता वृहस्पतिश्च॥ यथावा॥

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ। करु णाविमुखेन मृत्युना हरता त्वां वद किन्न मे हृतम्॥

सर्व्वत्रैवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते तां विना प्रायेणालङ्कारत्वायोगात् अत एवोक्तं। सैषा सर्व्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्य्यः कोऽलङ्कारोनया विनेति॥

स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत्। वस्तु तद्गुणतामेति भण्यते सतु तद्गुणः। वस्तुतिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसंपदोपरक्तं तत्प्रतिभासमेव यत्समासादयति स तद्गुणः तस्याप्रकृतस्य गुणोऽत्रास्तीति॥ उदाहरणं॥

विभिन्नवर्णा गरुडाग्रजेन सूर्य्यस्य रथ्याः परितः स्फुरन्त्या रत्नैः पुनर्यत्र रुचारुचं स्वामानिन्यिरे वंशकरीरनीलैः॥

अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता तद्रूपाननुहारश्चेदस्यतत्स्यादतद्गुणः यदि तु तदीयं वर्णं सम्भवन्त्यामपि योग्यतायामिदंन्यूनगुणं न गृह्णीयात्तदा भवेदतद्गुणोनाम॥ उदाहरणं॥

धवलोसि जहविसुन्दर तहवि तुए मज्झ रंजिअं हिअअं। राअभरिए विहिअए सुहअणि हित्तोण रत्तोसि॥

अत्रातिरक्तेनापि मनसा संयुक्तोन रक्ततामुपगत इत्यतद्गुणः किञ्च तदित्यप्रकृतमस्येतिच

प्रकृतमत्र निर्दिश्यते तेन यदप्रकृतस्य रूपं प्रकृतेन कुतोपि निमित्तान्नानुविधीयते सोऽतद्गुण इत्यपि प्रतिपत्तव्यं ॥ यथा ॥

गाङ्गमम्बुसितमम्बुयामुनं कज्जलाभमुभयत्र मज्जतः। राजहंस तव सैव शुभ्रता चीयते नच नचापचीयते ॥

यद्यथा साधितं केनाप्यपरेण तदन्यथा तथैव यद्विधीयेत सव्याघात इति स्मृतः। येनोपायेन यदेकेनोपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यदन्यथाकरणंस स्वसाधितवस्तुव्याहतिहेतुत्वाद्व्याघातः ॥ उदाहरणं ॥

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥

सैषासंसृष्टिरेतेषा भेदेनयदिह स्थितिः। एतेषां समनन्तरमेवोक्तस्वरूपाणां यथासम्भवमन्योन्यनिरपेक्षतया यदिह शब्दभाग एव अर्थविषय एवोभयत्रापि वावस्थानं सैकार्थसमवायस्वभावा संसृष्टिः तत्र शब्दालङ्कारसंसृष्टिः ॥

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया। चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया ॥

अर्थालङ्कारसंसृष्टिः ॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥

पूर्व्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे शब्दार्थालङ्कारयोः संसृष्टिः ॥

सोणत्थि एत्थ गामे जोएअं मह्महत्तलाअसं। तरुणाणंहिअअलुडिंपरिसप्पन्तीं णिवारेइ ॥

अत्रानुप्रासोरूपकञ्चान्योन्यानपेक्षे संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात्। अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वन्तु सङ्करः। एत एव यत्रात्मन्यनासादितस्वतन्त्रभावाः परस्परमनुग्राह्यानुग्राहकतां दधति स एषां सङ्कीर्य्यमाणस्वरूपत्वात्संकरः॥ उदाहरणं॥

आत्ते सीमन्तचिह्ने मरकतनिहते हैमताटङ्कपत्रे लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते। शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन् गुञ्जाफलानां सजइति शवरा नैव हारं हरन्ति ॥

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतं तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः॥ यथावा॥

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो वियोगिव्यापत्तेरिव कलितवैराग्यविशदः। परिप्रेङ्खत्तारापरिकरकपालाङ्कितत ले शशीभस्मापाण्डुः पितृवन इव व्योम्नि चरति॥

उपमारूपकमुत्प्रेक्षाश्लेषश्चेति चत्वारोऽत्र पूर्व्ववदङ्गाङ्गितया प्रतीयन्ते कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते। अस्य हि रूपकत्वे तिरोहितकलङ्करूपमक्षवलयमेव मुख्यतयावगम्यते। तस्यैव च करग्रहणयोग्यतायां सार्व्वत्रिकी प्रसिद्धिः श्लेषच्छायया तु कलङ्कस्य करधारणमसदेव प्रत्यासत्त्योपचर्य्य योज्यते शशाङ्केन केवलं कलङ्कस्य मूर्त्त्यैवोद्वहनात् कलङ्कोऽक्षवलयमिवेति तूपमायां कलङ्कस्योत्कटतया प्रतिपत्तिः नचास्य करधृतत्वं तत्त्वतोस्तीति मुख्येप्युपचार एव शरणं स्यात् एवंरूपस्य सङ्करः शब्दालङ्कारयोरपि परिदृश्यते॥ यथा॥

राजति तटीयमभिहतदानवरासातिपातिसारावनदा।
गजताच यूथमविरतदानवरासातिपातिसारावनदा॥

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे। एकस्यच ग्रहेन्यायदोषाभावादनिश्चयः द्वयोर्बहूनां वालङ्काराणामेकत्र

समावेशे विरोधाच्च युगपदवस्थानं नचैकत मस्ति येनैकतर एव परिगृह्येत स निश्चयाभाव रूपो द्वितीयः सङ्करः समुच्चयेन सङ्करस्यैवाक्षेपात् ॥ उदाहरणं ॥

जहमहिरोजहरअणविअरोजहअणिस्मलक्काओ। तहकिं विहिणाएसो सरसवाणिओ जलणिहोणकिओ ॥

अत्र समुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थ प्रतीतेः किमसौ समासोक्तिः किमब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीते रियमप्रस्तुतप्रशंसेति सन्देहः ॥ यथावा ॥

नयनानन्ददायीन्दोर्विम्बमेतत्प्रसीदति। अधुना विभि रूढाश्रमविशीर्णमिदन्तमः ॥

अत्र किं कामस्योद्दीपकः कालोवर्त्तत इति भङ्ग्य न्तरेणाभिधानात्पर्य्यायोक्तमुततद्वदनस्येन्दुविम्ब तयाध्यवसानादतिशयोक्तिः किंवैतदिति वक्ता निर्दिश्य तद्रूपारोपवशाद्रूपकं अथवा तयोः समु च्चयविवक्षायां दीपकं अथवा तुल्ययोगिता किमु प्रदोषसमये विशेषणसाम्यादाननस्यावगतौ समा सोक्तिः आहोस्विन्मुखनैर्मल्यप्रस्तावादप्रस्तुतप्रशं सेति बहूनां सन्देहादयमेव सङ्करः यत्रतु न्यायदो

षयोरन्यतरस्यावतारस्तत्रैकतरस्य निश्चयान्न संश
यः न्यायस्य साधकत्वमनुकूलता दोषोपि बाधकत्वं
प्रतिकूलता तत्र सौभाग्यं वितनोति वक्त्रशशिनो
ज्योत्स्नेवहासद्युतिरित्यत्र मुख्यतयावगम्यमानाद्धा
सद्युतिर्वक्त्रएवानुकूल्यं भजते इत्युपमायाः साधकं
शशिनितु न तथाप्रतिकूलेति रूपकंप्रति तस्याऽबा
धकता वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्यु
द्यत इत्यत्रापरत्वमिन्दोरनुगुणं नतु वक्त्रस्य प्रति
कूलमितिरूपकस्य साधकतां प्रतिपद्यतेनतूपमाया
बाधकतां राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भ
रमित्यत्र पुनरालिङ्गनमुपमां निरस्यति सदृशं प्रति
प्रेयसीप्रयुक्तस्यालिङ्गनस्यासम्भवात् पादाम्बुजं भव
तुनोविजयाय मञ्जुमञ्जीरसिञ्जितमनोहरमम्बि
काया इत्यत्र मञ्जीरसिञ्जितमम्बुजे प्रतिकूलम
सम्भवादिति रूपकस्य बाधकं नतु पादेऽनुकूलमि
त्युपमायाः साधकमभिधीयते विध्युपमर्दिनोबाध
कस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः एवमन्यत्रापि
सुधीभिः परीक्ष्यं॥ स्फुटमेकत्रविषये शब्दार्थालङ्का
रस्य परिग्रहे साधकं तदितरस्य परिहारे बाधके

तिह्यं व्यवस्थितञ्च अभिन्नएव पदे स्फुटतया यदु
भावपि शब्दार्थालङ्कारौ व्यवस्थां समासादयतः
सोप्यपरः सङ्करः ॥ उदाहरणं ॥

स्पष्टोल्लसत्किरणकेसरसूर्य्यविम्बविस्तीर्णकर्णिकमथोदिवसा
रविन्दं। श्लिष्टाष्टदिग्दलकलापमुखावतारवद्धान्धकारमधु
पावलिसंचुकोच ॥

अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ तेनासौत्रि
रूपः परिकीर्त्तितः तदयमनुग्राह्यानुग्राहकतया
संदेहेनैकपदप्रतिपाद्यतया व्यवस्थितत्वात्त्रिप्रका
रएव सङ्करोव्याकृतः प्रकारान्तरेणतु न शक्योव्या
कर्त्तमानन्त्यात्तत्प्रभेदानामिति प्रतिपादिताःशब्दा
र्थोभयगतत्वेन त्रैविध्यजुषोलङ्काराः कुतः पुनरेष
नियमोयदेतेषां तुल्येपि काव्यशोभातिशयहेतुत्वे
कश्चिदलङ्कारः शब्दस्य कश्चिदर्थस्य कश्चिच्चोभय
स्येति चेत् उक्तमत्र यथा काव्ये दोषगुणालङ्का
राणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यति
रेकावेव प्रभवतोनिमित्तान्तरस्याभावात् ततश्च
योलङ्कारोयदीयावन्वयव्यतिरेकावनुविधत्ते सत
दलङ्कारोव्यवस्थाप्यतइति एवञ्च यथा पुनरुक्त
वदाभासः परम्परितरूपकं चोभयोर्भावाभावान

विधायितयोभयालङ्कारौ। तथा शब्दहेतुकार्थान्तरन्यासप्रभृतयोपि द्रष्टव्याः अर्थस्यतु तत्रैव वैचित्र्यमुत्कटतया प्रतिभासत इतिवाच्यालङ्कारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः योलङ्कारोयदाश्रितः स तदलङ्कार इत्यपि कल्पनायामन्वयव्यतिरेकावेव समाश्रयितव्यौ। तदाश्रयणमन्तरेण विशिष्टस्याश्रयाश्रयिभावस्याभावादित्यलङ्काराणां यथोक्तनिमित्तएव परस्परव्यतिरेकोज्यायान् एषां दोषा यथायोगं सम्भवन्तोपि केचन उक्तेष्वन्तर्भवन्तीति न पृथक्प्रतिपादिताः तथाह्यनुप्रासस्य प्रसिद्ध्यभावोवैफल्यं वृत्तिविरोध इति ये त्रयोदोषास्ते प्रसिद्धिविरुद्धतामपुष्टार्थत्वं प्रतिकूलवर्णताञ्च यथाक्रमं न व्यतिक्रामन्ति तत्स्वभावत्वात्॥ क्रमेणोदाहरणं॥

चक्रीचक्रारपङ्क्तिंहरिरपि च हरीन् धूर्जटिर्धूर्ध्वजान्तानक्षं नक्षत्रनाथोरुणमपि वरुणः कूवराग्रं कुवेरः। रंहःसङ्घःसुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोन्वहमहिमरुचेः सोऽवतात्स्यन्दनोवः॥

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिरनुप्रासानुरोधेनैव कृता न पुराणेतिहासादिषु तथाप्रतीतेति प्रसिद्धिविरोधः ॥

भणतरुणिरमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि यदि सलीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे। अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरं परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥

अत्र वाच्यस्य विचिन्त्यमानं न किञ्चिदपि चारुत्वं प्रतीयत इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम ॥

अकुण्ठोत्कण्ठेति ॥

अत्र शृङ्गारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुध्यतइति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः यमकस्य पादत्रयगतत्वेन यमनम प्रयुक्तत्वं दोषः ॥ यथा ॥

भुजङ्गमस्येव मणिः सदम्भाग्राहावकीर्णेव नदी सदम्भाः।
दुरन्ततांनिर्णयतोपिजन्तोः कर्षन्ति चेतः प्रसभंसदम्भाः ॥

उपमायामुपमानस्य जातिप्रमाणगतन्यूनत्वमधिकता वा तादृश्यनुचितार्थत्वं दोपः धर्मांश्येतु न्यूनाधिक्ये यथाक्रमं हीनपदत्वमधिकपदत्वञ्च न व्यभिचरतः ॥ क्रमेणोदाहरणं ॥

चाण्डालैरिव युष्माभिः साहसं परमं कृतं। वह्निस्फुलिङ्ग इव भानुरयं चकास्ति। अयंपद्मासनासीनश्चक्रवाकोविराजते। युगादौ भगवान्वेधा विनिर्मित्सुरिव प्रजाः। पातालमिव तेनाभिस्तनौ चितिधरोपमौ। वेणीदंडःपुनरयं कालिन्दीपातसन्निभः॥

अत्र चाण्डालादिभिरुपमानैः प्रस्तुतोर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता॥

समुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन्। व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान्॥

.थमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वं॥

स पीतवासाः प्रगृहीतशार्ङ्गोमनोज्ञभीमं वपुराप कृष्णः। शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः॥

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनोग्रहणमतिरिच्यते इत्यधिकपदत्वं लिङ्गवचनभेदोप्युपमानोपमेययोः साधारणं चेद्धर्ममन्यरूपं कुर्य्यात् तदेकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषण

स्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्म्मेणप्रतीयत इति प्रक्रान्तस्यार्थस्य स्फुटम निर्वाहादस्य भग्नप्रक्रमरूपत्वं ॥ यथा ॥

चिन्तारत्नमिव च्युतोसि करतोधिग्मन्दभाग्यस्य मे। सक्तोभक्तितादेव शुद्धाः कुलवधूरिव ॥

यत्रतु नानात्वेपि लिङ्गवचनयोः सामान्याभिधायिपदं स्वरूपभेदं नापद्यते न तत्रैतद्दूषणावतारः। उभयथाप्यस्यानुगमक्षमस्वभावत्वात् ॥ यथा ॥

गुणैरनर्घैः प्रथितो रत्नैरिव महार्णवः। तद्वेषोसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः। दधते स्म परांशोभां तदीया विभ्रमा इव ॥

कालपुरुषविध्यादिभेदेपि न तथाप्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः ॥ यथा ॥

अतिथिन्नामकाकुत्स्थात्पुत्रमाप कुमुद्वती। पश्चिमाद्यामिनी यामात्प्रसादमिव चेतना ॥

अत्र चेतनाप्रसादमाप्नोति न पुरापेति कालभेदः ॥

प्रत्ययमज्जनविशेषविविक्तमूर्त्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता। विभ्राजसे मकरकेतनमर्चयन्ती बालप्रवालविटपप्रभवा लतेव॥

अत्र लताविभ्राजते नतु विभ्राजसइति संबोध्यमाननिष्ठस्य परभागस्यासंबोध्यमानविषयतया व्यत्यासात्पुरुषभेदः गङ्गेव प्रवहतु ते सदैवकीर्त्तिरित्यादौ च गङ्गा प्रवहत्विति अप्रवृत्तप्रवर्त्तनात्मनोविधेः एवं जातीयकस्य चान्यस्यार्थस्योपमा नगतस्यासम्भवाद्विध्यादिभेदः ननु समानमुच्चारितं प्रतीयमानं धर्म्मान्तरमुपादाय पर्य्यवसितायामुपमायामुपमेयस्य प्रकृतधर्म्माभिसम्बन्धान्न कश्चित्कालभेदोस्ति यत्राप्युपात्तेनैव सामान्यधर्म्मेणोपमावगम्यते यथा युधिष्ठिरइवायं सत्यं वदतीति तत्र युधिष्ठिरइव सत्यवाद्ययं सत्यंवदतीति प्रतिपत्त्यामद्देसत्यवादी सत्यंवदतीति चन पौनरुक्त्यमाशङ्कनीयं स्वपोषं पुष्णातीतिवत् युधिष्ठिरइव सत्यवदनेन सत्यवाद्ययमित्यर्थावगमात् सत्यमेवैतत् किंतुस्थितेषु प्रयोगेषु समर्थनमिदं नतु सर्व्वथा निरवद्यं प्रस्तुतवस्तु प्रतीतिविघातादिति सचेतस

एवाच प्रमाणं असादृश्यासम्भवावप्युपमायामनु चितार्थतायामेव पर्य्यवस्यतः ॥ यथा ॥

ग्रथ्नाति काव्यशशिनं विततार्थरश्मिं ॥

अत्र काव्यस्य शशिनार्थानाञ्च रश्मिभिःसाधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थं ॥

निपेतुरास्यादिव तस्य दीप्ताः शराधनुर्म्मण्डलमध्यभाजः।
जाज्वल्यमाना इव वारिधारा दिनार्द्धभाजःपरिवेषिणोर्कात्॥

अत्रापि ज्वलन्त्योम्बुधाराः सूर्य्यमण्डलान्निष्पतन्त्योन सम्भवन्तीत्युपनिबध्यमानोर्थोनौचित्यमेव पुष्णाति उत्प्रेक्षायामपि सम्भावनं ध्रुवेवादय एव शब्दावक्तुमुत्सहन्ते न यथाशब्दोपि केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्य्याप्तत्वात्तस्य चास्याम विवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः॥ यथा॥

उद्ययौ दीर्घिकागर्भात्मुकुलं मेचकोत्पलं। नारीलोचन चातुर्य्यशङ्कासंकुचितं यथा॥

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वान्निरुपाख्यप्रख्यं तत्समर्थनाययदर्थान्तरन्यासोपादानं तदालेख्यमिव गगनतलेऽत्यन्तमसमीचीन

मिति निर्व्विषयत्वमेतस्यानुचितार्थतैव दोषः ॥ यथ ॥

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारं
क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसामतीव ॥

अत्राचेतनस्य तमसो दिवाकरात्त्रासएव न सम्भवतीति कुतएव तत्प्रयोजितमद्रिणा परित्राणं सम्भावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थएव तत्समर्थनायां यत्नः साधारणविशेषणवशादेव समासोक्तिरनुक्तमप्युपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयता यत्तदपुष्टार्थत्वं पुनरुक्तता वा दोषः ॥ यथा ॥

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयैव विजृम्भिततापया।
अतनुमानपरिग्रहयास्थितं रुचिरया चिरया दिवसश्रिया ॥

अत्र तिग्मरुचेः ककुभाञ्च यथासदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहेण च नायकतया नायिकतयाच व्यक्तिस्तया ग्रीष्मदिवसश्रियोपि प्रतिनायिकात्वं भविष्यतीति किन्दयितयेति स्वशब्दोपादानेन श्लेषोपमायास्तु सविषयीयञ्चोपमानस्योपा

सामान्येन सहचरेणापि विशेषणेषु न तथा प्रतीतिः ॥ यथा ॥

सत्पल्लवतया नाम्रभास्वत्करविराजिना । प्रभातसन्ध्ये वास्वापफललुब्धेहितप्रदेति ॥

अप्रस्तुतप्रशंसायामुपमेयमर्थेव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थितं नेयं यथा ॥

आहूतेषु विहङ्गमेषु मशको नायान्पुरो वार्यते मध्ये वारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम् । खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां धिक्सामान्यमचेतनं प्रभुमिवामृष्टतत्वान्तरं ॥

अत्राचेतनस्य प्रभोरप्रस्तुत विशिष्टसामान्यद्वारेणाभिधाने न युक्तमेव पुनः कथनम् अनेनेऽलङ्कारदोषा यथासम्भविनोन्नेया एवं जातीयकाः पूर्वोक्तैरेवदोषजातैरन्तर्भाविता न पृथक्प्रतिपादनमर्हन्तीति संपूर्णमिदं काव्यलक्षणम् ॥

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशम उल्लासः ॥
